अथ त्रिमल्लिनाथप्रतिष्ठापुस्तक लोयस
स्य॥ ॥ ॥ ॥

श्रीगणेशाय नमः॥ अथ त्रिमल्लिनाथप्रतिष्ठा लिख्यते॥
यजमानः सुस्नातः प्रक्षालितपाणिपादः श्रीपण्यादिपीठेउ
पविश्य कुलदेवता गुर्वादीन्नमस्कृत्य॥ आचम्य प्राणाना
यम्य देशकालौ स्मृत्वा॥ एवंगुणविशेषणविशिष्टा
यां पुण्यतिथौ॥ मम सपरिवारस्य आयुरारोग्यऐश्व
र्याभिवृद्ध्यर्थं अनेकमन्वंतरकालावछिंन लोकपाल
जल निवासपूर्वक लक्ष्मीसहितविष्णुपुर गमन पूर्व
क कल्पकोटिशतकालावछिंनविष्णुपुराधिवासार्थं
सकलमनोरथसिध्यर्थं दृषन्मयस्तंभस्थित त्रिमल्लि
नाथ स्थापनं वा दारुमयस्तंभस्थ त्रिमल्लिनाथस्था

पनं वा पाषाणधात्वादि घटित त्रिमल्लिनाथप्रतिष्ठां वाय
थोक्तविधिना करिष्ये॥ तदंगभूतं गणेशपूजनपूर्वकं पुण्या
हवाचन मातृकापूजा पूर्वकं नांदीश्राद्धं च करिष्ये॥ इति सं
कल्प्य॥ गणेशपूजनादि कृत्वा॥ आचार्यं वरयेत्॥ तद्य
था॥ गोत्रोच्चारपूर्वकं अस्मिन् कर्मणि आचार्यत्वेन
त्वामहं वृणे इत्याचार्यं वृत्वा॥ प्रार्थयित्वा॥ आर्ये चोक्तेति॥
ततो ब्रह्माणं वृत्वा॥ प्रा०॥ यथा चतुर्मुखो०॥ ततोऽष्टौ ऋत्वि
जो वृत्वा॥ संप्रार्थ्य॥ स्तंभारोपसमीपं गत्वा॥ स्तंभप्र
तिष्ठापक्षे स्तंभारोपविधिरुच्यते॥ तद्यथा॥ महीद्यौरि
ति भूमीं स्पृष्ट्वा॥ संपूज्य॥ तत्र हस्तपरिमाणं गर्तं खात्वा
तन्मध्ये पंचामृतं तत्तन्मंत्रैर्निक्षिप्य॥ सर्वौषध्यादि

पंचपल्लवान्॥ गंधादिचरु दूर्वाशैवालादि च निक्षिपेत्॥
ततस्तं भेदेवस्य प्रार्थनं कुर्यात्॥ मूर्तिप क्षेमतो प्रार्थनां कु
र्यात्॥ सयथा॥ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः॥
प्राकृतं त्वमदृष्ट्वा मां बालवत्वतिपालयेत्॥ उत्तिष्ठस्व॥
ततः॥ मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भा
सितांगं॥ पुण्योपेतं पुंडरीकायताक्षं विष्णुं वंदे सर्वलोकैक
नाथं॥ ततः पादतलस्पर्शलोहपातजनित दोषपरिहारा
र्थं अग्न्युत्तारणादि करिष्ये॥ इति संकल्प्य॥ उदकेन सं
प्रोक्ष्य॥ भो अग्ने अस्याः मूर्तेः सर्वावयवेभ्यः सर्वधातु
भ्यः संक्रामणात् पादतलस्पर्शलोहपातजनित दोषं श

मय तापं दाहं च नाशय २ मूर्तेः सर्वांगेषु स्फीतलतां कु
रु २ सां सीं सूं सैं सौं सः॥ यां यीं यूं यैं यौं यः स्वाहा॥ पुनः कुर्द
र्वेदनजपमासि मनःशिलाशात पञ्चमुस्ताः चूर्णेनो
द्वर्तनं॥ मूर्ते अंगप्रत्यंगावयवेभ्यः दाहं विनाशय स्फुशी
तलत्वं सुकुमारत्वं देहि देहि स्वाहा॥ एवं दशवारं पुनः
अभिमंत्रणादि कुर्यात्॥ ततो मानस्तोके॥ गोमय्या उद्वर्तनं॥
शुद्धोदकस्नानं॥ स्योना पृथिवी भवेति सप्तमृत्तिकास्ना
नं॥ ततो देवं घृतेनाभ्यज्य हरिद्राचूर्णेनोद्वर्त्य उष्णोदके
न स्नापयित्वा॥ पीठांतरे संस्थाप्य॥ धूपेन धूपयित्वा पु
ष्पैः संपूज्य॥ नूतनवस्त्रेणावेष्टयित्वा॥ परमान्नेन बलिं
दद्यात्॥ ततो मूर्तेर्विलिमिकं मध्य हृदश्चाके सा॥ संशोध्य॥

अग्निहोत्रभस्मनासंशोध्य॥ जलेनप्रक्षाल्य॥ आप्या
यस्वेतिपंचगव्यैः संस्नाप्य॥ आप्यायस्वेति॥ दधिक्राव्याक्रू
कू॥ घृतंमिमिक्षेकू॥ मधुवाता॥ स्वादुःपवस्वकू॥ आयं
गौः॥ एतैर्मंत्रैः पयदधिघृतंमधुशर्कराद्यैः॥ पंचामृतैः
स्नापयत्वा॥ घृतेनाभ्यज्य॥ उद्वर्तनेनोद्वर्त्य सुखोष्णो
दकेनप्रक्षाल्य॥ सुगंधेनानुलिप्य॥ त्वांनोदेवीरितिसंस्र
वकलशेनसंस्नाप्य नमस्कृत्य गंधाक्षतार्घार्चितैः सपल्ल
वैः॥ चतुर्भिःकलशैः समुद्रज्येष्ठाइतिस्नापयेत्॥ ततोया
वांकशेतिपंचकलशस्नानं॥ इरावतीतिसप्तमस्नानं॥
गामषुणासस्येतिगोमयस्नानं॥ देवस्यत्वेतिकुशोद
कस्नानं॥ आप्यायस्वेतिपयस्नानं॥ गायत्र्यागोमूत्रे॥

याओषधीरितिसर्वौषधी॥ भगप्रणेतरितिभस्म॥ दधि
क्राव्णइतिदधि॥ घृतंमिमिक्षेघृतो॥ मधुवातामधु॥ स्वादुःप
वस्वेतिशर्करा॥ इमंमेगंगेइतिगंगोदकं॥ गंधद्वारामितिगो
मयं॥ आपोहिष्ठेतित्रिऋचा॥ उष्णोदकं॥ शीतोदकं॥ ततोह
तेवाससी परिधाप्य उपवीतं दत्वा॥ गंधादिपंचोपचारैः संपू
ज्य॥ हिरण्यगर्भइतिपिष्टमयैः दीपैः नीराजयेत्॥ प्रति
दिक्षु बलिदानंदीपदानंच॥ ततोआनोभद्राइतिसूक्तेन उत्ति
ष्ठब्रह्मणस्पतइत्यनेनोत्थमूर्तिपक्षेमूर्तिस्तंभपक्षेस्तंभमुत्थाप्य
गर्तासमीपेसंस्थाप्य भुवंसंपूज्य गर्तेआवरणपूजांकुर्यात्॥
यथा॥ आधारशक्त्यै०॥ मंडूकाय०॥ कूर्माय०॥ शेषाय०॥ वरा
हाय०॥ सर्वेभ्यो०॥ बलिदानांतंपूजयेत्॥ ततःपूर्वाद्यष्टदि

दिक्षु॥ ऐरावताय॰। पुंडरीकाय॰। वामनाय॰॥ वामनाय॰। कु
मुदाय॰। अंजनाय॰। पुष्पदंताय॰। सार्वभौमाय॰। सुप्रतीका
य॰॥ इति पूजनं॥ उद्वयस्व वनस्पते ऋक्॥ त्रिनेत्रानीसंग
मनी॥ एताभ्यामग्न्यागार्ते संस्थाप्य॥ गौरसर्षपानादाय परि
तो विकरेत्॥ असर्पितु॰। रक्षोहणं॰॥ ततः श्रीमल्लिनाथस्ते
भपश्चिमतः सर्वतोभद्रं वारुणमंडलं वा विरच्य तन्मध्ये दे
व परिवारदेवतास्थापयेत्॥ ततोदौ देवस्य आदित्यगर्भा
धानं॥ शयावर्ण्यं॥ अस्थिमध्युनाताः मज्जा॥ मेधांमेमासं॥
इमं जीवेभ्य इति जीवाधारणं॥ मामाहिंसी इमनः॥ वाचस्प
तयेवाक्॥ पुरुषस्य॰ इति पुरुषः॥ पंचनद्य इति मंत्रेण पुंस
वनमुच्यते॥ आप्यायस्वेति मंत्रेण सीमंतोन्नयनं स्मृतं॥

अग्नेजातानीति जातकर्म उदाहृतं॥ ब्रह्मजज्ञानमिति नामक
रणं॥ ततः सुवर्णशलाकया पात्रस्थं मधुघृतमादा
य चित्रं देवानामर्धर्चेन पाश्रीस्थिस्वा देवनेत्रे दक्षिणपूर्व
कं उन्मीलनयेत्॥ तदानकाश्चित्पुरस्तिष्ठेत्॥ ततो नेत्रो
न्मीलनानंतरं नमो भगवते तुभ्यं च महत्परमात्मने॥ हिर
ण्यरेतसे विष्णो विश्वरूपाय ते नमः॥ अथ आदर्शमक्ष्यभो
ज्यादीनि दर्शयेत्॥ आचार्याय दक्षिणां दद्यात्॥ ततः प्रा
णप्रतिष्ठा पूर्ववत्कार्याः॥ नमस्तेस्तु संगाम्येति जपेत्॥
ततो गंधाद्यैः संपूज्य मासनामकार्यं॥ ऊरूं हीति नामक
र्म॥ आप्यायस्वेति निष्क्रमणं॥ अन्नपतेस्येनमाप्रानं॥ भ
द्रं कर्णेभिरिति कर्णवेधः॥ शिवोनामेति चोलं॥ इयं

पुरुक्तादितिमौंजीबंधनं॥ खा घलडुकादिभिक्षासमर्पणं॥ यु
वासुवासा इतिवस्त्रं॥ यज्ञोपवीतमितियज्ञोपवीतं॥ मित्र
स्यचक्षुरितिरुद्रराजिनं॥ स्वस्तिनोमिमीतेतिदंडं॥ तत्स
वितुरितिस्वाध्यायं॥ इतिमौंजीबंधनं॥ मृप्पुष्पकंसस्मरे
त॥ अस्मेदेवा इतिमंत्रेपाधिवाहश्चकार्यः॥ ततोमंडल
मध्येआवर्णपूजांकुर्यात्॥ तत्रैवेमः॥ मध्येब्रह्माणं॥ पूर्वादिदिक्षु
मंडलप्रांतेषुइंद्रादिलोकपालान्॥ ईशाद्यंतरालेष्वष्टवसून्॥ त
तोयथावकाशं॥ रुद्रान्॥ आदित्यान्॥ अश्विनौ॥ विश्वेदेवान्॥
पितॄन्॥ स्कंदं॥ ईशानादिप्रहलेषु॥ दक्षं॥ विष्णुं॥ दुर्गां॥ स्वधां॥
समुद्रान्॥ सरितः॥ मरुतः॥ गणपतिं॥ कार्पिश्रादध्याः॥ पृथ्वी
तलाद्युपरिसंस्थापयेत्॥ दिक्पालायुधानिवाहनानिच

तद्वाहो॥ गौतमभरद्वाजविश्वामित्रकश्यपजमदग्निवसिष्ठा
त्रिऋषीन्॥ तद्वास्तोयहान्॥ तद्वासेऐंद्रीकुमारीवाराहीचामुं
डावैष्णवीमाहेश्वरीवैनायकीसप्तशक्तिः॥ संस्थाप्यपूजये
त्॥ ततोदेवस्यपरितः॥ अष्टदिक्षुकलशान्संस्थाप्य॥ पयः
पृथिव्यामित्यादिमंत्रैः पयःप्रभृतिसर्वौषधीपंचपल्लवान्ज
लेनापूर्य॥ कलशोदकेन अष्टऋत्विजः॥ पुरुषसूक्तेनदेवसे
स्नाप्यपूजयेत्॥ ततःकुंडेअग्निंप्रतिष्ठाप्यविष्णुसूक्तजपः
कार्यः॥ चरुंश्रपयित्वाज्यभागांतेग्रहस्थापनपूजनंचचरु
त्वाहोमंकुर्युः॥ तत्रादौसमित्तिलचरुयवद्रव्यैर्ग्रहहोमः॥
इदंविष्णुरितिपालाशौदुंबराश्वत्थन्यग्रोधापामार्गसमि
द्वर्याज्यतिलयवद्रव्यैरष्टोत्तरसहस्रमष्टोत्तरशतंवाहोमः॥

ततस्त्रिमल्लिनाथाय नमः॥ स्वाहेतिनाम मंत्रेण अष्टोत्तर
शतं तैलैमः॥ मंडलदेवताहोमो नाममंत्रेण कार्यः॥ ततोग्नि
संपूज्य॥ स्विष्टकृद्धोमं विधाय॥ नवाहुत्यादिआज्ञानांते कर्म
विधाय पूर्णाहुतिं जुहुयात्॥ ततो देवसमीपमागत्य स्तंभप
से श्रुचा द्यौरितिनिखनेत्॥ ॐ नमो ब्रह्मणे इत्यादिमंत्रं
पठेत्॥ ततो नवकलशं अंभसापूर्य सर्वौषधिनिक्षिप्या
भ्यर्च्य यजमानस्य पुरतः संस्थाप्य कुंभमुखे हस्तं दत्वा देव
मंत्रेणाष्टाविंशति वारमभिमंत्र्य तत्र तीर्थान्यावाह्य देवस्य
पुरतः यजमानमभिषेकमंत्रैरभिषिंचेत्॥ ततः सुमुहूर्ते कृतं
न्यासो देवमयं जल्वा स्तंभे देवेवा आवहणा साहतस्त्रिमल्लि
नाथाय इतिचिवारमंत्रैः उच्चारयन् तूर्यघोषेण प्रतिष्ठा
देवस्य ध्रुवा ध्रुवा द्यौरिति मंत्रं जप्त्वा कर्णे सव्याहृतिका गाय

६

त्रीं जपित्वा॥ गायत्री तु॥ त्रिमल्लिनाथाय विद्महे त्र्यंबकेशा
य धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ ततो मूलमंत्र प्रतिमा
कर्णे जप्त्वा पुरुषसूक्तेन उत्तिष्ठेत्॥ अथ यजमानः॥ स्वाग
तं देव देवेशेति पठेत्॥ सकलत्रः शरणं प्रपद्य पुष्पांजलिं दद्यात्॥
ततो महापूजां कृत्वा॥ त्र्यंबकेशाष्टकेन स्तुतिः कार्या॥ लक्ष्मीनृसिं
हं मनसा भजामि मनोमनोघैः कृत्यनकैः पदार्थैः॥ गोरोचना
कुंकुमचंदनेन नानाविलेपैर्भगवन्नमीडे॥ ३॥ यस्तं भात् ऊर्जमा
नोगगडगडगड ड्वा लचंडार्धदंष्ट्रो हेमांभोध्या समानोस्य
सडसडसड टसाश्यमानः सफाभिः॥ दंष्ट्रोगैः खाद्यमा
नः ककरकरकरत्ततर्जनीमानसूनोनिः क्रांतो हास्य युक्तो
गगह गहगह रूपात् भुमोनारसिंहः॥ ततो नर पूजां कृत्वा
ब्राह्मणेभ्यो यजमानाच्छीर्वादं कृत्वा॥ ततो यजमानेन ब्राह्मणा

७

संपूज्य॥ भोजनादिदक्षिणां दद्यात्॥ ततो विसर्जयेत्॥ इति
श्रीमल्लिनाथः प्रतिष्ठाविधिः समाप्तः॥ विनायकार्पणमस्तु॥
अथ विष्णुपूजनं॥ पूर्ववत् पद्ममष्टदलं कृत्वा॥ तन्म
ध्ये नारायणं चतुर्भुजं शालग्राम शिलां वा अष्टकलं वा पीठं कोरेत्तं
पूजयेत्॥ पूजोपकरणान्यानीय॥ अग्नेस्तत्पुरस्सि पूजोपकर
णानि संप्रोक्ष्य॥ अद्येहेत्यादि कालं ज्ञात्वा नं स्मृत्वा॥ सकलकाम
नासिद्ध्यर्थं विष्णुपूजनमहं करिष्ये॥ इति संकल्प्य॥ एकस्मि
न्पात्रे विष्णुं स्थाप्य॥ हस्तेक्षतान्गृहीत्वा॥ देवदेव जगन्नाथ
सर्वाभरणभूषित॥ रमया सहितं ध्यायेत्सर्वविघ्नोपशांतये॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ एष हि नारायणश्च
क्रपाणेः सर्वामरैर्वंदितपादपद्मा॥ पीठे च देवं गरुडासनं पूजो
वदिन्नयास्मत्कुलं आनंदसमग्रयान्॥ प्रतद्विष्णुरित्यावा

हनं॥ विश्वव्यापन्मूर्ते त्वं विश्वाधार जगत्पते॥ परमानंद
देवेश योगीनां ध्यानमूर्तये॥ ततस्तन्मूलमंत्रेणाभिमंत्र्य स्य
चतुर्भुजो॥ नवाम्रपल्लवाभासं पिंगभ्रूश्मश्रुलोचनं॥ पी
तांबरधरं देवं शंखचक्रगदाधरं॥ अलंकृतसमुद्भूतं विश्व
रूपं विचिंतयेत्॥ विष्णोररावमसि ध्यानं॥ रत्नैर्मणिः पीठम
ध्ये सिंहासनसमन्वितं॥ योगीनां ध्यानमूर्तेश्च सर्वव्यापिनमी
श्वरं॥ प्रतद्विष्णुरित्यासनं॥ चक्रायुधं विश्वपतिं पुराणं गदा
धरं सर्वसुरैकवंद्यं॥ परात्परं सर्वगतं सुनीलं भजामि देवं सह
तं सलक्ष्म्याः॥ विष्णोर्नुकमिति पाद्यं॥ शंखवासिन्चकोध
तबाहुर्विष्णो गदाब्जहस्तस्य चरवङ्गपाणे॥ अर्घ्यं प्रयच्छामि ज
नार्दनस्य श्रियायुतस्यापि धराधिपस्य॥ विष्णो ररावमित्यर्घ्यं॥
गंगाजलेः समानीतं सुवर्णकलशेः स्थितं॥ आचम्यतां ह

७

शीकेशात्रैलोक्यस्थापनाचार्यन॥तद्दिआसो इत्याचमनीयं॥
दामोदरायमुनिपूजितपादपद्मभुक्तंजनानांसुखदुःखविना
शनाय॥वैकुंठलोलनीयायमहाध्वजायलक्ष्मीप्रियायभ
वतेहिनमोनमस्ते॥आप्यायस्वेतिक्षीरस्नानं॥दधिक्रा
व्णाइतिदधि॥घृतंमिमिक्षेइतिघृतं॥मधुवाताइतिमधु॥स्वा
दुःपवस्वेतिशर्करा॥दामोदरंविश्वधरंपरेशंविचित्रकीर्ति
श्रुतिभूतलमयं॥पमागतिस्थूलगतिर्वरेण्यंभजामिविष्णुंसु
रराजवंद्यं॥श्रीणिपदापुरोदकस्नानं॥तद्दिआसइत्याच
मनीयं॥तदनंतरंपूर्वमपूर्वदेशोपनिविष्टंस्थाप्य॥स्वर्णाच
लंविचित्रतरंसुक्षोभितकौशेययुग्मेपरिकल्पितंच॥दामो
दरंश्रावस्पोगृहाणमयाविलंआवत्तदिव्यरूप॥विष्णोःक

र्माणीतिवस्त्रं॥पुनराचमनं॥आनंदमूर्तिकमलासना
यप्रोस्फुल्लपंकेरुहलोचनेत्रो॥देत्यांतकंदेवपतिंविशालं
सनातनंब्रह्मभजामिदेवं॥तद्दिष्णोःउपवीतं॥आचम
नं॥अथोत्तरीयं॥सर्वाधिपंयज्ञपतिंमुरारिंनंदात्मजं
विश्वपतिंमहांतं॥कंसारिमिंद्रावरजंरमांकपुण्यःकरंस
र्वगतंभजामि॥आदित्यवर्णंउत्तरीयं॥कस्तूरिकाकर्दम
चंदनंचकाकाश्मीरसंयोजितकंदरैःशुभैः॥विलेपनंश्री
कुरुदेवदेवश्रीदिव्यचक्षुर्यविलेपनांगः॥तद्दिआसइ
तिगंधं॥गोपीजनानंदकरंमुकुंदंचराचरप्राणगुरुंमधु
हस्तं॥कंसातकंगोपचरंपुराणंभजामिविष्णुंकुलवृद्धि
हेतोः॥विष्णोःकर्माणि॥सेवंतिकाबकुलचंपकपाटला

कै पुन्नागजातीकरवीररसालपुष्पैः॥ बिल्वप्रवालतुलसीदल
मालिकाभिस्त्वां पूजयामि जगदीश्वर वासुदेव॥ इदं विष्णुरिति पु
ष्पाणि॥ पुष्पमालांच॥ श्रीखंडलाक्षासितकाष्ठदिव्यकर्पूरकृष्णा
गरुचंदनानि॥ कचोरवालाघनदेवदारूमांसीनखैः गुग्गुलजप
तिकंच॥ कृष्णागरुप्रचुरगुग्गुलगंधधूपैर्नानाविधासुर
भितारवस्तुनिकरैः॥ त्वां धूपयामि जगदीश्वर वासुदेव लक्ष्मी
पते मयि दयां कुरु लोकनाथ॥ यत्पुरुषमिति धूपं॥ दीपावलीगो
घृतवर्तियुक्तं सूर्येंदुकोटिप्रभ वासुदेव॥ गृहाण तद्रत्नप्रपूजि
तांघ्रिपद्मप्रवालाथ विराजमानो॥ आज्यं च वर्ति०॥ ब्राह्मणो
स्येति दीपं॥ सौवर्णे स्थालिमाध्ये मणिगणखचिते गोघृताक्तान्सु
पक्वान्॥ भक्ष्यान्भोज्यांश्च लेह्यानपरिमितसुमहान्नचो

क्षीरस्नानीयसुक्तं

ष्यमन्नं विलाय॥ नानाशाकैरुपेतं दधिमधुसुगुडौतां बुलं चैवयुक्तं
तांबूलं चैवयुक्तं प्रतिदिवसमहं मानसं कल्पयामि॥ अपूपान्वि
विधान्स्वादून्शालिपिष्टोपपाचितान्॥ मधुरान्गुडसंयुक्तान्
सजीरकमरीचिकान्॥ अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितं॥
शीतोदकं शीतलं च कर्पूरैलापवासितं॥ सार्द्रदधिसंस्कृतकस्य साक्षा
दमृतमेनच॥ मयासमर्पितं देव संगृहाण श्रियासह॥ अन्नपतइ
ति नैवेद्यं॥ आचमनीयं॥ उष्णादिकं शुद्धिकरं चंदनं शीतलोत्तमं
गृहाणतांच मयादेवं करोद्वर्तन कांक्षिभिः॥ उपयामगृहीतोस्यादि
त्येभ्यस्त्वेति करोद्वर्तनं॥ खर्जूरं कदलीरसालपनसद्राक्षाः क
पित्थं त्रयं॥ रुच्यं स्वादुमनोपमं फलयुतं संगृहाणतामच्युतं॥ षड्
स्यस्तिलमोदकान्गुडयुतान्नानाविधामोदकान्पानो
द्यैः पृथकैश्चचात्तकैरयुतां खंडेक्षुगंधाश्रयः॥ याः फलिनीरितिफ

तं॥ भक्तैकगम्यं पुरुषं मुरारिं वेदांतवेद्यं ... त्रिगुणात्मरूपं॥ श्री कौस्तुभोरस्कमुदारकांतिं वसुप्रदं प्रेषणरूपं भजेहं॥ हिरण्यगर्भ इति दक्षिणा॥ रमाकलत्रं नृपराजपुत्रं सुवर्णगात्रं जगदातपत्रं जगत्पवित्रं ग्रहराजगात्रं स्वगास्यशात्रुं सततं भजामि॥ विष्णो कुरुमि तिष्ठत्वं॥ शंखचक्रगरुडासनशोभं नीलमेघसदृशं सुरमीशं॥ श्रीमरुपत्तनयापतिमीड्यं पूजयामि कुलवर्द्धनहेतोः॥ अध्यः स्तंभ इति चामरं॥ नीराजनं स्वीकुरु देवदेव नीलोत्पलश्याम लनीलजाक्षः॥ स्वमायया पिंकृतसर्वलोक तानप्रदीपांकुरु तेनमोस्तु॥ प्रियेजातइति नीराजनं॥ अथ पुष्पांजलिः॥ भावितं सुरसुरारिमुनींद्रैः पादपद्मविचिन्तशुभतीर्थं॥ तं भजामि भुभगः कुलवृद्ध्यै गोपवेषधरणी नरमीशं॥ यज्ञेन यज्ञेनेति

पुष्पांजलिः॥ अथ प्रदक्षिणा॥ गोविंदाय नमस्तुभ्यं नमस्ते विश्वमूर्तये॥ प्रदक्षिणां कृतो देव गृहाण सुरसत्तम॥ सप्तास्यास न्निति प्रदक्षिणा॥ वंद्याय सर्वदेवानां गोविंदाय नमो नमः॥ गृहाण देवदेवेश नमस्कारं मया कृतं॥ वेदाहमेतमिति नमस्कारः॥ बहुभिरुपचारैश्च यन्मया पूजनं कृतं॥ प्रारब्धकर्मसिध्यर्थं देवाय कल्पयामि ते॥ सांगाय श्रीविष्ठवे परिवारान्विताय च॥ एतानि गंधादीनि गोविंदः प्रियतां न मम॥ इति श्रीमल्लिनाथ प्रतिष्ठासमाप्ता॥ वरदराजार्पणमस्तु॥ अथ स्तंभप्रतिष्ठा सामग्री लिख्यते॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

सुवर्णाचि मूर्ति १ येक
कलशोपीतळ्याचे १
एक आज्यस्थाळी १
चरुस्थाळी २
मृत्तिकेचे कलशे २५
पंचपात्र १५
सेल तीन ३ एक डुच
धोत्र ५ पाचे सुवर्णशला
का तीन ३ सुपारी धडाभर
आंबले डेबु सुताचे डुइनरे
क। साळि १ तरट्यचूर्ण शर्क
रा आदरी कर्पूर १ तोळा ज
पमासीतोळा पनसी छतोळा

नूतनपत्र। भुस्ता। गुळ
लो समिधा। पंचपल्लवा
न। तील। पालास। समि
धा॥ औदुंबर। अश्वत्थ
न्यग्रोधा। अपामार्ग। स
मिद्या। नारळ १० पादुका।
आदर्श। घंटा। यज्ञोपवीत
सेवाळा। सर्वौषधी। गोम
यमृत्तिका। कुश॥ गोदक
सर्षप। विभूति॥ गो
मूत्र। पय। दधि॥

घृत
मधु
शर्करा
चरु
दीपक
इतिस
कोनसा
मग्री॥
७८॥